



# संस्कृतभाषा अभ्यासपुस्तिका

वेदविभूषणद्वितीयवर्षम् / उत्तरमध्यमा द्वितीयवर्षम् / कक्षा द्वादशी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् ।
अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
न कर्म लिप्यते नरे ।
मा गृधः कस्यस्विद्धनम् ।
कृषिमित्कृषस्व ।
विद्ययाऽमृतमश्नुते ।
माता भूमिः पुत्रोऽहं पृथिव्याः ।











| | | | |
|---|---|---|---|
| 1. | ब्रह्म पुराण | 10. | ब्रह्मवैवर्त पुराण |
| 2. | पद्म पुराण | 11. | लिङ्ग पुराण |
| 3. | विष्णु पुराण | 12. | वाराह पुराण |
| 4. | वायु पुराण | 13. | स्कन्द पुराण |
| 5. | भागवत पुराण | 14. | वामन पुराण |
| 6. | नारद पुराण | 15. | कूर्म पुराण |
| 7. | मार्कण्डेय पुराण | 16. | मत्स्य पुराण |
| 8. | अग्नि पुराण | 17. | गरुड पुराण |
| 9. | भविष्य पुराण | 18. | ब्रह्माण्ड पुराण |







**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# प्रथमः पाठः

## श्रीमद्भागवते कृषिधर्मः

कृषिः मानवमात्रस्य कृते उदरपोषणेन सह धनधान्यादिदात्री, अन्नस्य प्रसादिका, भौतिकसमृद्धिप्रदात्री, लौकिकवस्तूपलम्भनद्वारा लोकहितस्य साधयित्री चेति मत्वा तादृशी कृषिवृत्तिः अनुसरणीयेति वेद आदिदेश "कृषिमित् कृषस्व" इति। कृषिशास्त्रस्य प्रथमोपदेष्टा प्रजापतिरेव, स मनवे शास्त्रमिदमुपदिदेश। ततो राजा पृथुः कृषिशास्त्रं शिशिक्षे।

भागवते प्रतिपादितः कृषिधर्मः श्रीमद्भागवतपुराणस्य चतुर्थस्कन्धस्य सप्तदशाध्याये ज्ञानी विदुरः प्रश्नद्वारा पुराणकालिकं कृषिधर्मरहस्यम् उद्घाटयति। तत्र विदुरस्य प्रश्ना इत्थम् -

**कस्मादुद्दधार गोरूपं धरित्री बहुरूपिणी।**
**यां दुदोह पृथुस्तत्र को वत्सो दहनं च किम्॥**

*भागवते ४-१७-३*

प्रकृत्या विषमा देवी कृता तेन समा कथम् इति अर्थात् (१) केन वा कारणेन भूमिः गोः सास्नादिमत्याः रूपं धृतवती? (२) पृथुः कथं दुदोह? (३) को वा दोहनानुकूलः वत्सः? (४) दोहनपात्रं वा किम् आसीदिति? ऋषिशापाद् वेने लयं गते, तत्पुत्रः पृथुः राज्यं शशास। तदनु प्रजाः निरन्नाः क्षुधापीडिताश्च संबभूवुः।

प्रजावत्सलः पृथुः प्रजानां दुःखं निशम्य, क्रुद्धो धृतशरासनो भूमिं लक्ष्यीकृत्य विशिखं सन्दधे। उदायुधं पृथुं वीक्ष्य वेपमाना धरणी गोरूपं धृत्वा आह - हे राजन्! आकृतिकिल्बिषां मां कथं जिघांसते भवान्? योषिदेषा अहन्तव्या खलु? इमां गोरूपां भूमिं मां विपाट्य, धनुषा संविध्य, आत्मानं प्रजाः प्रतिष्ठितं विश्वं च जले कथं वा धास्यसि? इति च अपृच्छत्? तदा पृथुराह - राज्ञः शासनपराङ्मुखीं त्वां वधिष्यामि, राज्ञो मम आज्ञातिलङ्घनमेव भूमेः प्रथमापराधः। भूमिः या त्वं पृथुराज्ये यज्ञे देवतारूपेण भागं भजसे, परं धान्यादिकं त्वं न सृजसि, न ददासि, एष उपकारानभिज्ञायास्तव भूमेः द्वितीयोऽपराधः। अतः उद्यतधनुर्भूत्वा तव मांसपिण्डेन प्रजानां क्षुधां शमयिष्यामीति इत्थं राज्ञो वचो निशम्य गोरूपा पृथिवी करुणोक्तिभिः पृथुं श्रीमन्नारायणांशं तुष्टाव भीतभीता।

**वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम्।**
**भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु॥**
**यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः।**
**तस्यामेवं हि दुष्टायां दण्डो मात्रा न शस्यते॥**

*भागवते ४-१७-२२*

तत्राष्टादशेऽध्याये ओषधि-वनस्पतिप्रभृतीनां संस्तम्भनकारणानि प्राह गोरूपधारिणी धरा- पुरा ब्राह्मणा जीवनार्थत्वेन स्वर्गाद्यर्थानुष्ठानत्वेन च सृष्टा या ओषधयः ताः लोकपालनयज्ञाद्यनुष्ठानरूपव्रतरहितैः भुज्यमानाः दृष्टाः। असद्भिः भुज्यमाना इमाः समूलं नश्येयुः इति भावना।

**पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते।**
**भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः॥**
**अपालितानादृता च भवद्भिर्लोकपालकैः।**
**चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः॥**

प्राचीनैः लोकपालैः पृथिवी अपालिता अनादृता च। सर्वोऽपि लोकः चोरप्रायः सञ्जातः। तस्मात् यज्ञनिमित्तम् ओषधीरग्रसे गिलितवती। असद्भिर्भुज्यमाना ओषधयः न रोक्ष्यन्ति, ततश्च यज्ञादयो न सिद्ध्यन्ति इत्यालोच्य गिलितवती। मया गीर्णा ओषधयः महता कालेन मयि जीर्णाः अभूवन्। निश्चितेन उपायेन ते पुनः आदातुं शक्यन्ते।

यदि भवान् राजा भूतानाम् ऊर्जस्वद् बलप्रदमन्नं वाञ्छति तर्हि मम (भूमेः) गोरूपायाः अनुरूपं वत्सं, दोहनपात्रं, दोहनकर्तारं च उपकल्पय। वत्स-दोहन-पात्र-दोहनरूपैः सामग्रीसम्भारैः प्रीता वत्सला गोरूपधारिणी धरा क्षीरमयान् क्षीरप्रकृतिकान् कामान् इच्छाविशेषान् ओषधीः छन्दस्सोमवीर्यौजोबलासवादयः तान् धोक्ष्ये, क्षीररूपेण पूरयिष्यामि।

एतच्छ्रुत्वा पृथुः, ओमित्यङ्गीचकार। **स्वायम्भुवं मनुं वत्सं कृत्वा, पाणौ दोहनपात्रे स्वयं दोग्धा भूत्वा सकलौषधिप्रकृतिभूतं क्षीरम् अधोक्।** पृथुः क्षीरं प्रदुह्य, धरित्र्यां तद् विकिरन् ओषधीः प्रादुर्भावयामास। अपि च भूमिं कृषियोग्यां समां चकार।

एतत्परमेव ऋषयः, सुरगणाः, दैत्याः दानवाश्च, गन्धर्वाप्सरसः, पितरः, सिद्धाः, मायिनः, यक्षरक्षोभूत-पिशाचाः, अहिदन्दशूक-सर्पाः, पशवः, क्रव्यादाः, वटवत्साः, गिरयश्च स्वमुख्यवत्सं परिकल्प्य पृथक् पृथक् पयः धरित्रीं दुदुहुः।

**तथापरे च सर्वत्र सारमाददते बुधाः।**
**ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम्॥**

*भागवते ४-१८-१३*

# द्वितीयः पाठः

# ईशावास्योपनिषद्

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥**

**अन्वयः** - जगत्यां यत् किञ्च जगत् अस्ति इदं सर्वम् ईशा वास्यम्। तेन त्यक्तेन भुञ्जीथाः। कस्यस्वित् धनं मा गृधः॥

ईशा ईशेन इदं प्रत्यक्षतो दृश्यमानं सर्वं वास्यं वसनीयम् आच्छादनीयम्। सर्वं परमात्मना व्याप्तम् इति परमात्मनः सर्वत्र स्थितिं चिन्तयेत्। यत्किञ्च जगत्यां लोकत्रये जगद् जङ्गमादि चलत्स्वभावं स्वस्वामिभावसम्बन्धयुक्तम्। तेन सर्वेण त्यक्तेन त्यक्तस्वस्वामिभावसम्बन्धेन भोगान् भुञ्जीथाः। मा गृधः। माभिकाङ्क्षीः। ममेदमिति धियं त्यज। कस्यस्विद्धनम्। धनं कस्य स्वित्? कस्य पुनरेतद्धनम्?, न कस्यापि सर्वार्थस्य स्वस्वामिभावसम्बन्धः अविद्या।

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**

**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**

**अन्वयः** - इह कर्माणि कुर्वन् एव शतं समाः जिजीविषेत्। एवं त्वयि नरे इतः न अन्यथा अस्ति येन कर्म न लिप्यते॥

निष्कामानि मुक्तिहेतुकानि अग्निष्टोमादीनि कर्माणि कुर्वन् शतं समाः शतवर्षपर्यन्तं जिजीविषेत्। त्वं जीवितुमिच्छेः। शतं समाः शतवर्षपर्यन्तं यावदायुः पर्यवसानं तावदित्यर्थः। नान्यथेतोस्ति इतः प्रकारात् अन्यथा मुक्तिर्नास्ति। निष्कामकर्मानुष्ठानेन शुद्धान्तःकरणस्यैव मुक्तिर्नान्यथा, मुक्तये न अन्यः उपायः इत्यर्थः। न कर्म लिप्यते नरे। मुक्त्यर्थं क्रियमाणं कर्म नरे मनुष्ये न लिप्यते न सम्बध्यते, मुक्तिकारणान्तःकरणशुद्ध्यापादकत्वेनोपक्षीणत्वात्। उक्तं च बृहदारण्यके "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन" इति।

**असुर्या नाम ते लोका अन्धेन तमसावृताः।**

**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥**

**अन्वयः** - असुर्याः नाम अन्धेन तमसा आवृताः ते लोकाः सन्ति। ये के च जनाः आत्महनः सन्ति ते प्रेत्य तान् अभिगछन्ति॥

असुर्याः असुराणामिमे। असुषु प्राणेषु रमन्ते असुराः प्राणपोषणरताः। असुर्या नामकाः ते लोकाः। लोक्यन्ते दृश्यन्ते अनुभूयन्ते कर्मफलानि यत्र इति लोका नाम जन्मानि। अन्धेन तमसा

अज्ञानलक्षणेन तमसा अन्धकारेण आवृताः सर्वतोवृताः। आत्मानं घ्नन्ति इति ये जनाः ते आत्महनः। यद्यपि आत्मा नित्यः अविनाशी च। अत्र आत्महन इति पदेन अविद्वांसः काम्यकर्मपराः लक्षिताः, विद्यमानस्य अजरामरस्य आत्मनः अविद्यादोषेण तैः जनैः तिरस्करणात्। ते जनाः जनित्वा म्रियन्ते, मृत्वा च जायन्ते। ते आत्महनः प्रेत्य मृत्वा देहं त्यक्त्वा तान् लोकान् असुर्यानामकान् गच्छन्ति। अन्यानि जन्मानि स्थावरान्तानि अपि गच्छन्ति। प्राप्नुवन्ति।

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**

**ततो भूय इव ते तमो य उ विद्यायां रताः॥**

**अन्वयः** - ये अविद्याम् उपासते ते अन्धं तमः प्रविशन्ति। ये उ विद्यायां रताः ते तमः भूयः तमः इव प्रविशन्ति ॥

ये उपासकाः साधकाः वा अविद्याम् उपासते, केवलानि स्वर्गार्थानि अग्निहोत्रादीनि कर्माणि अनुतिष्ठन्ति कुर्वते। ते अन्धन्तमः प्रविशन्ति तमः अज्ञानलक्षणं प्राप्नुवन्ति। संसारचक्रे एव भ्रमन्ति। संसारपरम्पराम् अनुभवन्ति। ये उ पुनः अन्तःकरणशुद्धिहेतुकानि कर्माणि सर्वथा त्यक्त्वा केवलं विद्यायाम् एव रताः। देवताज्ञाने एव रताः। ते पुनः भूय इव। बहुतरमेव। ज्ञानानुदयात् तमः अज्ञानलक्षणं प्राप्नुवन्ति। लोकयात्रायाः एव अभावेन दुष्करत्वात् अन्तःकरणशुद्ध्यभावात् च।

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥**

**अन्वयः** - यः विद्यां च अविद्यां च तत् उभयं सह वेद अविद्यया मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते॥

विद्याम् आत्मज्ञानं ब्रह्मज्ञानं देवताज्ञानं तथा अविद्यां अन्तःकरणशुद्धिहेतुकानि कर्माणि च उभयं द्वयं सह एकीभूतं वेद एकेनैव करणीयं वेद। कर्मकाण्डं ज्ञानकाण्डस्य अङ्गमिति वेद तथा अनुतिष्ठति च। सः योगी उपासकः अविद्यया उपासनया अन्तःकरणशुद्धिकारणैः अग्निहोत्रादिभिः मृत्युं तीर्त्वा, इह लोकयात्रां सम्यक् उत्तीर्य विद्यया आत्मज्ञाने ब्रह्मज्ञानेन देवताज्ञानेन अमृतम् मुक्तिम् अश्नुते प्राप्नोति।

**वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।**

**ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥**

**अन्वयः** - अथ वायुः अनिलम् अमृतम्। इदं शरीरं भस्मान्तं भूयात्। ओं क्रतोस्मर कृतं स्मर॥

कृतब्रह्मोपासनस्य योगिनः शरीरपातोत्तरं यद्भवति तदुक्तम् अत्र। वायुः अनिलं भवति, प्रकृतिमापद्यते, अमृतं परां ब्रह्म सम्पद्यते। वायुग्रहणं सप्तदशकलिङ्गोपलक्षणार्थम्। एकादश इन्द्रियाणि, पञ्च महाभूतानि, जीवात्मा एकः। स्थूलशरीरं भस्म एव भवति। ओम् इति ब्रह्मणः नाम प्रतीकं वा। हे क्रतो स्मर, यन्मम कृते कर्तव्यं तत् स्मर। प्रत्युपकारस्य कालः आगतः तत् स्मर इत्यर्थः। अस्मै को वा लोकः देयः इति हे अग्ने स्मर। कृतं स्मर। बाल्यात् प्रभृति मया अनुष्ठितं कर्म स्मर इत्यर्थः।

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**

**योऽसावादित्ये पुरुषः सोऽसावहम्। ओम् खम् ब्रह्म॥**

**अन्वयः -** हिरण्मयेन पात्रेण सत्यस्य मुखम् अपिहितम् (अस्ति)। पूषन् तत् सत्यधर्माय दृष्टये त्वम् अपावृणु॥

आदित्योपासना अत्र उल्लिखिता अस्ति। हिरण्मयेन हिरण्यवर्णेन तेजोरूपेण, ज्योतीरूपेण वा। पिबन्ति यत्र स्थिता रश्मयः रसान् इति पात्रं मण्डलम्। तेजोरूपेण मण्डलेन सत्यस्य आदित्यमण्डलस्थस्य अविनाशिनः पुरुषस्य (पुरि शेते अथवा पूर्णमनेन जगत्सर्वम् इति) मुखम् अग्रभागः शरीरम् इति यावत्। यः असौ प्रत्यक्षः आदित्यमण्डलस्थः पुरुषः सः अहमस्मि इति उपासनां कुर्यात्।

# तृतीयः पाठः

## मेघदूतम्

महाकविः कालिदासः पूर्वमेघे (६३) उत्तरमेघे (५२) आहत्य पञ्चदशोत्तरैकशतम् (११५) श्लोकान्वितं खण्डद्वयत्मकञ्च गीतिकाव्यं मेघदूतं प्रणिनाय। मेघ एव दूतः यस्मिन् तद् मेघदूतं काव्यम् इति। महाकविः कालिदासः ब्राह्मणवंशे जनिं लेभे। खण्डकाव्येऽस्मिन् उज्जयीन्याः प्रासादादीनां, नदीनां, तुङ्गगिरीणाञ्च वर्णनम् अत्यन्तं सुमधुरं मनोहारि च विद्यते। अतः महाकवेः निवासस्थानं उज्जयिनीति मन्वते।

समग्रे मेघदूते मान्दाक्रान्ता छन्दः, वैदर्भी रीतिः, विप्रलम्भश्रृङ्गारश्च विद्यते । अतः विद्वद्भिरुच्यते यत् **माघे मेघे गतं वयः** इति। खण्डकाव्यस्यास्योपजीव्यं ब्रह्मवैवर्त-पुराणमस्ति। दूतस्य कल्पना वाल्मीकिरामायणात् स्वीकृताऽस्ति। पाठेऽस्मिन् केषाञ्चन श्लोकानां सङ्ग्रहः कृतोऽस्ति। तद्यथा -

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥**

**अन्वयः -** स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमित-महिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छाया तरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥**

**अन्वयः -** धूमज्योतिः सलिलमरुतां सन्निपातः मेघः क्व ? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व ? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामार्ताः चेतनाऽचेतनेषु प्रकृतिकृपणाः।

**जातं वंशे भुवनविदिते पुष्करावर्तकानाम्**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहम्**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥**

**अन्वयः -** (हे मेघ) त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातम्, मघोनः कामरूपं प्रकृतिपुरुषं (अहं) जानामि, तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः (अस्ति), (हि) अधिगुणे मोघा (अपि) याञ्चा वरम्, (किन्तु) अधमे लब्धकामा (अपि) न (वरम्)।

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्,**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**
**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥**

**अन्वयः** - अनुकूलः पवनः त्वां मन्दं मन्दं यथा नुदति, ते वामः अयं सगन्धः चातकः च मधुरं नदति नूनं गर्भाधानक्षणपरिचयात् खे आबद्धमालाः बलाकाः नयनसुभगं भवन्तं सेविष्यन्ते।

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानाम्**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥**

**अन्वयः -** यदपि उत्तराशां प्रस्थितस्य भगवतः पन्थाः वक्रः (तथापि) उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः मास्म भूः। तत्र पौराङ्गनानां विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः लोचनैः न रमसे यदि वञ्चितोऽसि।

# चतुर्थः पाठः

## माता भूमिः पुत्रोऽहं पृथिव्याः

महान् शब्दराशिः वेदः भगवतः श्वासनिःश्वासरूप इति साक्षात्कृतधर्माणः मनीषिणः ऋषयः आमनन्ति। महर्षिः भगवान् वेदव्यासः एकधा विलसन्तं तं वेदं विभज्य पैल-वैशम्पायन-जैमिनि-सुमन्तुभ्यः शिष्येभ्यः क्रमेण ऋग्यजुस्सामाथर्ववेदान् उपदिदेश। वेदात् एव सर्वाः विद्याः भारते प्रवृत्ताः, विद्यास्थानानि च वेदमूलकानि एव सन्ति।

वेदेषु अनेकानि ऋषिदृष्टानि सूक्तानि सन्ति तेषु अथर्ववेदसंहितायाः द्वादशकाण्डस्य प्रथमं सूक्तं भूमिसूक्तनाम्ना प्रसिद्धम्, अत्र त्रिषष्टिः (६३) मन्त्राः सन्ति। अस्य अथर्वा ऋषिः, भूमिः पृथिवी वा देवता। स अथर्वा ऋषिः सूक्तेऽस्मिन् पृथिव्याः समग्रं सर्वतोमुखं च रूपं विस्तरेण अपश्यत्। इह पृथिव्याः निसर्गवर्णनम् अस्ति। अत्र केचन एव मन्त्राः परिचयार्थं समुल्लिखिताः। ते इत्थम्-

**सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।**
**सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥ १॥**

**अन्वयः** - बृहत् सत्यं, ऋतम्, दीक्षा, उग्रं तपः, ब्रह्म, यज्ञः (च) पृथिवीं धारयन्ति। सा भूतस्य भव्यस्य पत्नी पृथिवी नः उरुं लोकं कृणोतु॥

**सरलार्थः** - बृहत् सत्यं, ऋतम् उग्रं, दीक्षा, तपः, ब्रह्म, यज्ञश्च पृथिवीं सम्यक् धारयन्तः सन्ति। भूतस्य अतीतस्य, भव्यस्य भविष्यत्कालिकानां वा पालयित्री पृथिवी अस्माकं समेषां कृते विस्तृतं महान्तं लोकम् आवासस्थानं ददातु।

**असम्बाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।**
**नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२॥**

**अन्वयः** - यस्या मानवानां मध्यतः उद्वतः प्रवतः समं बहु असंबाधं या नानावीर्या ओषधीः बिभर्ति (सा) पृथिवी नः प्रथताम्, नः राध्यताम् ॥

**सरलार्थः** - या मध्यतः, उड्डयमानस्य, कम्पतः च जनस्य बाधाभिः रहिता अस्ति, या भूमिः नानाप्रभावपूर्णाः ओषधीः, वृक्षान्, वनस्पतिविशेषान् च धारयति, सा पृथिवी अस्माकं कृते सुविस्तीर्णा भवतु, अस्माकं कृते सिद्धिदा शोभिता च भवतु।

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।**
**यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु ॥३॥**

**अन्वयः** - यस्यां समुद्रः सिन्धुः उत आपः (सन्ति) यस्यां कृष्टयः अन्नं संबभूवुः यस्याम् इदं प्राणत् एजत् जिन्वति सा भूमिः नः पूर्वपेये दधातु॥

**सरलार्थः** - यत्र जनानां मनसः संमोदकः समुद्रः, आनन्ददाः नद्यः च जलपूर्णानि सन्ति, यत्र कर्षणात् स्वयम् अन्नं समुत्पादयन्ति मानवाः, यत्र प्राणिनः आनन्देन जीवन्ति, सा भूमिः अस्मान् आनन्दयतु निरन्तरम्।

**विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**
**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥६॥**

**अन्वयः** - विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतः निवेशनी, इन्द्रऋषभा भूमिः वैश्वानरम् अग्निं बिभ्रती नः द्रविणे दधातु॥

**सरलार्थः** - विश्वस्य भरणं पोषणं च कुर्वती, वसुनः धनविशेषस्य धारिणी, प्रकृष्टम् अचलम् आश्रयस्थानम्, मध्ये सुवर्णस्य विशिष्टस्य कान्तिमतः लोहस्य धारिणी, जगतः निवासभूमिः, अथवा यस्याः पृथिव्याः गोः इन्द्रः ऋषभसदृशः विराजते, सा पृथिवी वैश्वानरनामानम् अग्निं धारयन्ती अस्मभ्यं सम्पदं प्रददातु।

**गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु।**
**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**
**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्॥११॥**

**अन्वयः** - पृथिवि ते गिरयः हिमवन्तः पर्वताः, ते अरण्यं स्योनम् अस्तु। बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवाम् इन्द्रगुप्तां भूमिं पृथिवीम् अहम् अजीतः अहतः अधि अस्थाम्॥

**सरलार्थः** - हे पृथिवि! तव गिरयः हिमाच्छन्नाः महान्तः पर्वताश्च विश्वस्य कल्याणकारिणः, अरण्यानि वनानि कल्याणकारीणि सन्तु। पिङ्गलां, कृष्णां रोहिणीं च मृत्तिकां दधती स्थिरा इन्द्रेण गोपिता संरक्षिता सुविस्तृता पृथिवी पराजयरहिता अहिंसिता नाशरहिता सती चिरं प्रतिष्ठताम्।

**यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः।**
**तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः।**
**पर्जन्यः पिता स उ नः पिपर्तु॥१२॥**

**अन्वयः** - पृथिवि! यत् ते मध्यं, यत् नभ्यं च, या ते तन्वः ऊर्जः संबभूवुः तासु नः धेहि, नः अभि पवस्व भूमिः माता, अहं पृथिव्याः पुत्रः, पर्जन्यः पिता, स उ नः पिपर्तु॥

**सरलार्थः** - हे पृथिवि! तव यः धारणसमर्थः मध्यभागः अस्ति, यत् प्राणरक्षकं नाभिक्षेत्रं च यत्, यः तव शरीरात् उत्पन्नः रसः तेषु सर्वेषु अस्मान् धारयतु। अस्मान् पवित्रान् कुरु। मम भूमिः माता अस्ति, अहं पृथिव्याः पुत्रः अस्मि, मम पर्जन्यः पिता अस्ति, सः अस्माकं पालनं पोषणं च करोतु।

**त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।**

**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ॥१५॥**

**अन्वयः -** त्वत् जाता मर्त्याः त्वयि चरन्ति, त्वं द्विपदः त्वं चतुष्पदः बिभर्षि। पृथिवि इमे मानवाः येभ्यः मर्त्येभ्यः उद्यन् सूर्यः रश्मिभिः अमृतम् आतनोति ॥

**सरलार्थः -** हे मातः पृथिवि ! त्वत्तः जाताः प्राणिनः त्वयि एव विचरन्ति, त्वं द्विपदान् चतुष्पदान् च धारयसि। हे पृथिवि ! त्वं सर्वान् मनुष्यान् रक्षसि। उदयमानः सूर्यः स्वैः किरणैः अमृतसमानं प्रकाशं वितनोति।

**अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु।**

**अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ॥१९ ॥**

**अन्वयः -** अग्निः भूम्याम् ओषधीषु अग्निम्, आपो बिभ्रति, अग्निः अश्मसु, अग्निः अन्तःपुरुषेषु गोषु, अश्वेषु अग्नयः।

**सरलार्थः -** भूमौ, ओषधीषु, अग्निः वर्तते। जलम् अग्निं धारयति। उपलेषु अग्निः वर्तते। मनुष्येषु, गोषु, अश्वेषु अग्निः वर्तते।

**ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः।**

**ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्॥ ३६॥**

**अन्वयः -** हे भूमे ! ग्रीष्मः, वर्षाणि, शरत्, हेमन्तः, शिशिरः, वसन्तः, ते ऋतवः, ते विहिताः हायनीः अहोरात्रे, नः दुहाताम्।

**सरलार्थः-** हे पृथिवि! **षट् ऋतवः -** ग्रीष्मः, वर्षाणि, शरत्, हेमन्तः, शिशिरः, वसन्तः, इति, अहोरात्रम् अस्माकम् अभीष्टानि पूरयन्तु।

**यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः।**

**भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे॥ ४२॥**

**अन्वयः -** यस्याम्, अन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः, भूम्यै पर्जन्यपत्न्यै नमः अस्तु वर्षमेदसे ॥

**सरलार्थः-** यस्यां भूमौ अन्नं व्रीहिः यवः च तथा इमाः पञ्च कृष्टयः संभवन्ति , तस्यै वर्षमेदसे वृष्ट्या स्फीतायै भूम्यै पर्जन्यस्य पत्न्यै नमः अस्तु॥

# पञ्चमः पाठः

## प्रजानां योगक्षेमाराधनम्

संस्कृतगद्यकाव्ये कवित्रयस्य प्रामुख्यं दृश्यते - सुबन्धुः, बाणभट्टः, दण्डी च। अवन्तिसुन्दरीकथानुसारेण महाकविदण्डी भारवेः प्रपौत्रः आसीत्। अस्य पिता वीरदत्तः माता च गौरी आसीत्। अयं वैदर्भीशैल्याः कविरासीत्। अस्य कवित्वप्रतिभा एकेन श्लोकेन वक्तुं शक्यते। तद्यथा -

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**

**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

तथा च - **कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः इति।**

महाकविदण्डिना दशकुमारचरितम्, काव्यादर्शः, अवन्तिसुन्दरीकथा, छन्दोविचितिः, कलापरिच्छेदः, द्विसन्धानकाव्यम् इति ग्रन्थाः विरचिताः। एतेषु काव्येषु अष्टोच्छ्वासात्मकमिदं दशकुमारचरितं गद्यकाव्यम्। गद्यकाव्येऽस्मिन् दशकुमाराणां चरित्रचित्रणं वर्णितमस्ति, अत एव दशकुमारचरितम् इत्यस्याभिधानं सर्वथा सार्थकमेवास्ति। प्रस्तुतोऽयं पाठ्यांशो दशकुमारचरितस्य अष्टमोच्छ्वासाद् उद्धृतः। अस्मिन् पाठे विश्रुतचरितं वर्णितं विद्यते।

### प्रजानां योगक्षेमाराधनम्

अथ सोऽप्याचचक्षे - देव ! मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः। स त्रासगद्गदमगदत् - महाभाग ! क्लिष्टस्य मे क्रियतामार्य, साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रति कर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम् इति। अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य, तं च बालं वशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य, तरुतलमिषण्णस्तं जरन्तमब्रवम् - 'तात ! क एष बालः ? को वा भवान् ? कथं चेयमापदापन्ना ? इति। सोऽश्रुगद्गदमगदत् - 'श्रूयतां महाभाग ! विदर्भो नाम जनपदः तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशीलः, शास्त्रप्रमाणः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असंबद्धप्रलापेष्वदत्तकर्णः, कदाचिदप्यवितृष्णो गुणेषु, अतिनदीष्णः कलासु, नेदिष्ठोधर्मार्थसंहितासु, स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्त्ता, प्रत्यवेक्षिता कोशवाहनयोः यत्नेन परीक्षिता सर्वाध्यक्षाणाम्, उत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः सद्यः प्रतिकर्ता दैवमानुषीणामापदाम्, षाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य, पुण्यश्लोकः, पुण्यवर्मानामासीत्।

स पुण्यैः कर्मभिः प्राप्य पुरुषायुषम्, पुनरपुण्येन प्रजानामगण्यतामरेषु। तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत्। स सर्वगुणैः समृद्धोऽपि दैवदण्डनीत्यां नात्यादृतोऽभूत्। तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत - तात! सर्वैवात्मसम्पदभिजनात्प्रभृत्यन्यूनैवात्र भवति लक्ष्यते। बुद्धिश्च निसर्गपद्वी कलासु। नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रति विशिष्यते। तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु, अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः। बुद्धिशून्यो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते। न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम्।

अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते। न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय। अतिक्रान्तशासनाश्च प्रजा यत्किञ्चनवादिन्यो यथाकथं चिद्वर्तिन्यः सर्वाः स्थितीः संकिरेयुः। निर्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानं च भ्रंशयते। आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा। दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहित-विप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमयदण्डनीतिं कुलविद्याम्। तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धि-रस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीम् इति।

# षष्ठः पाठः

# नीतिश्लोकाः

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥१॥**

**भावार्थः -** यत्र नारीणां पूजनं भवति तत्र देवता रमन्ते किन्तु यत्र नारीणां पूजनं न भवति तत्र सर्वा क्रिया अफला अर्थाद् निष्फला भवन्ति।

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**

**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥४॥**

**भावार्थः -** धनव्ययस्य त्रयः मार्गाः भवन्ति। ते च दानं, स्वयं भोगः, विनाशश्च। यो न ददाति, न भुङ्क्ते, तस्य धनस्य तृतीयमार्गः विनाश एव भवति। तादृशजनस्य इहलौकिकं सुखं शश- विषाणप्रायमेव।

**श्रियं प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि।**

**संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः॥५॥**

**भावार्थः -** बुद्धिः परिशुद्धा भवति चेत् कामधेनुरिव वैभवं ददाति। आपदं दूरीकरोति। कीर्तिं ददाति। पापं निवारयति। सत्संस्कारैः शुद्धत्वेन च जनं पवित्रं करोति।

**तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः**

**सत्यं ब्रूह्यानुयाहि साधुपदवीं सेवस्व विद्वज्जनम्।**

**मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं**

**कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्॥७॥**

**भावार्थः -** आशां कर्तय। क्षमागुणमाश्रय गर्वं त्यज। पापासक्तः मा भूः। सत्यं वद। सज्जनमार्गमनुसर। पण्डितानां सेवां कुरु। मान्यान् पूजय। शत्रून् अपि अनुनयेन वशिकुरु। गुरौ भक्त्या प्रवर्तस्व। नम्रतां विधेहि। आत्मश्लाघां मा कुरु। कीर्तिमर्जय। दुःखिते जने दयां कुरु। एतत्सर्वं सज्जनानां लक्षणम्।

**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम्।**

**आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः॥९॥**

**भावार्थः -** पण्डितमतयः (विवेकिनः) मानवाः अप्राप्यं किमपि न वाञ्छन्ति। विनष्टं मनसि निधाय शोकासक्ताः न भवन्ति। विपत्काले विवेकं न त्यजन्ति।

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।**

**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥१०॥**

**भावार्थः -** ज्ञानवान् जनः शिक्षकः भवितुमर्हति। किञ्च स्वेनाधिगतं ज्ञानमितरेभ्यो नैपुण्येन प्रसारयितुं यः शक्नोति स उत्तमशिक्षकः भवितुमर्हति। यस्मिन् ज्ञानमपि विद्यते तत्प्रकटन-सामर्थ्यमपि विद्यते स आदर्शशिक्षको भवितुमर्हति। अर्थात् समेषां शिक्षकाणां ज्ञानेन सह बोधनकौशलमावश्यकम्।

**वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता**
**विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।**
**भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले,**
**येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः॥११॥**

**भावार्थः -** सत्पुरुषसङ्गतिवाञ्छादिभिः निर्मलैः गुणैरलङ्कृता महान्तो महामणयः सज्जनशिरोमणयः पुरुषाः समस्तैर्जनैरादरणीया नमस्करणीया अनुकरणीयाश्च। इत्थं विशिष्टगुणानां मानवपुङ्गवानामेव नमस्कारार्हत्वादिति भावः।

# सप्तमः पाठः

# आर्यावर्तवर्णनम्

'नलचम्पूः' इति महाकविश्रीत्रिविक्रमभट्टविरचितम् एकं महनीयं गद्यपद्यात्मकं चम्पूकाव्यमस्ति। अयं महाकविः शाण्डिल्यगोत्रीयकर्मनिष्ठब्राह्मणपरिवारे जनिमलभत। पिता नेमादित्यः पितामहश्च श्रीधरः आसीत्। अयं राष्ट्रकूटवंशस्य राज्ञः इन्द्रराजस्य सभापण्डितोऽ- भवत्। अस्य काव्यस्य नायकः नलः नायिका च दमयन्ती विद्यते। नलचम्पू आख्यायिका इत्युच्यते। सुप्रसिद्धेऽस्मिन् नलचम्पूकाव्ये सप्त उच्छ्वसाः सन्ति। तत्र प्रस्तुतोऽयं पाठ्यांशः प्रथमोच्छ्वासस्य 'आर्यावर्तवर्णनम्' इत्यंशः संगृहीतः।

अस्ति समस्तविश्वम्भराभोगभास्वल्ललामलीलायमानः, समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथाबन्ध इव नीरसस्य मनोहरः, भीम इव भारतालङ्कारभूतः, कान्ताकुचमण्डलस्पर्श इवाग्रणीः सर्वविषयाणाम्, अनधीतव्याकरण इवादृष्टप्रकृतिनिपातोपसर्गलोपसवर्णविकारः, पशुपतिजटाबन्ध इव विकसितकनककमलकुबलयोच्छलितरजः पुञ्जपिञ्जरितहंसावतंसया प्रचुरचलच्चकोरचक्रवाककारण्डव-मण्डलीमण्डिततीरया भगीरथभूपालकीर्तिपताकया स्वर्गगमन-सोपानवीथीयमानरिङ्गत्तरङ्गया गङ्गया पुण्यसलिलैः प्लावितश्चन्द्रभागालङ्कृतैकदेशश्च, सारः सकलसंसारचक्रस्य, शरण्यः पुण्यकारिणाम्, आरामो रामणीयककदलीवनस्य, धाम धर्मस्य, आस्पदं सम्पदाम्, आश्रयः श्रेयसाम्, आकरः साधुव्यवहाररत्नानाम्, आचार्य-भवनमार्यमर्यादोपदेशानामार्यावर्तो नाम देशः।

यस्मिन्ननवरतधर्मकर्मोपदेशशान्तसमस्तव्याधिव्यतिकराः पुरुषायुषजीविन्यः सकल-संसारसुखभाजः प्रजाः। तथा हि, कुष्ठयोगो गान्धिकापणेषु, स्फोटप्रवादो वैयाकरणेषु, सन्निपातस्तालेषु, ग्रहसङ्क्रान्तिर्ज्योतिःशास्त्रेषु, भूतविकारवादः सांख्येषु, क्षयस्तिथिषु, गुल्मवृद्धिर्वनभूमिषु, गलग्रहोमत्स्येषु, गण्डकोत्थानं पर्वतवनभूमिषु, शूलसम्बन्धश्चण्डिकायतनेषु दृश्यते न प्रजासु।

यत्र चतुरगोपशोभिताः सङ्ग्रामा इव ग्रामाः, तुङ्गसकलभवनाः, सर्वत्र नगा इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः प्रभञ्जना इव जनाः, प्रियालपनसाराणि यौवनानीव वनानि, विटपिहिताश्चटिका इव वाटिकाः, निर्वृतिस्थानानि सुकलत्राणीवेक्षुक्षेत्र-सत्त्राणि, जलाविलक्षणाः पशुपुरुषा इवाप्रमाणास्तडागभागाः, कुपितकपिकुलाकुलिता लङ्केश्वरकिङ्करा इव भग्नकुम्भकर्णघनस्वापाः कूपाः, पीवरोधसः सरित इव गावः, सन्ती व्रतापदोषाः सूर्यद्युतय इव कुलस्त्रियः।

यत्र च मनोहारिसारसद्वन्द्वास्तत्पुरुषेण द्विगुना चाधिष्ठित कादम्बरी गद्यबन्धा इव दृश्यमानबहुव्रीहयः केदाराः।

किं बहुना ।

नास्ति सा नगरी यत्र न वापी न पयोधरा।
दृश्यते न च यत्र स्त्री नवापीनपयोधराः॥२६॥

अपि च ।

भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः।
जायन्ते न तु लोकस्य कदापि च विपल्लवाः॥२७॥

यत्र सौराज्यरञ्जितमनसः सकलसमृद्धिवर्धितमहोत्सवपरम्परारम्भनिर्भराः सततमकुलीनं कुलीनाः प्राप्तविमानमप्राप्तविमानभङ्गाः, कतिपयवसुविराजितमनेकवसवः, समुपहसन्ति स्वर्गवासिनं जनं जनाः।

कथं चासौ स्वर्गान्न विशिष्यते। यत्र गृहे-गृहे गौर्यः स्त्रियः, महेश्वरो लोकः, सश्रीका हरयः, पदे-पदे धनदाः सन्ति लोकपालाः। केवलं न सुराधिपो राजा। न च विनायकः कश्चित् ।

यत्र च लतासम्बन्धः कलिकोपक्रमश्च पादपेषु दृश्यते, न पुरुषेषु। यत्र च मरकवार्ता परमहिमोपघातश्च तुहिनाचलस्थलीषु श्रूयते न प्रजासु।

यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः, सटोऽप्यवटसङ्कुलः, कारूपयुतोऽप्यपगत-रूपशोभः।

यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वैषमुलूकाः, अपत्यत्यागं कोकिलाः, बन्धुजीवविघातं ग्रीष्मदिवसः, कुर्वन्ति न जनाः।

किं बहुना -

देशः पुण्यतमो देशः कस्यासौ न प्रियो भवेत्।
युक्तोऽनुक्रोशसम्पन्नैर्यो जनैरिव योजनैः॥२८॥
तस्य विषयमध्ये निषधो नामास्ति जनपदः प्रथितः।
तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति॥२९॥
जननीति मुदितमनसा सततं सुस्वामिना कृतानन्दा।
सा नगरी नगतनया गौरीव मनोहरा भाति॥३०॥

# अष्टमः पाठः

# मुद्राराक्षसम्

## ग्रन्थपरिचयः -

मुद्राराक्षसं संस्कृतवाङ्मयस्य एकमुत्कृष्टम् ऐतिहासिकं राजनैतिकं नाटकम्। नाटकस्यास्य रचयिता विशाखदत्तः। अस्य रचना चतुर्थशताब्द्याम् अभवत्। मुद्राराक्षसम् अतिरिच्य कृतिद्वयं विद्यते विशाखदत्तस्य, यथा- देवीचन्द्रगुप्तम्, अभिसारिकवञ्चितकं च। नाट्यग्रन्थेऽस्मिन् चाणक्यचन्द्रगुप्त-सम्बद्धवृत्तमाश्रित्य चाणक्यस्य राजनैतिकांशः अतीव उत्कृष्टतया विश्लेषितः। विशाखदत्तेन नाट्यग्रन्थेऽस्मिन् इतिहासराजनीत्योः सुष्ठु समन्वयः कृतः।

मुद्रया गृहीतो राक्षसः यस्मिन् तद् मुद्राराक्षसम्। नाटकेऽस्मिन् सप्त अङ्काः सन्ति। अत्र चाणक्यस्य कूटनीति अतीव विलक्षणा दृश्यते।

## कथावस्तु -

मुद्राराक्षसस्य कथावस्तुनः मुख्याधारः भवति महामात्यः राक्षसः। राक्षसस्य योग्यतां स्वामिभक्तिञ्च परिलक्ष्य चाणक्यः तं चन्द्रगुप्तस्य महामात्यं कर्तुम् ऐच्छत्। कौटिल्यः सुष्ठु जानाति यत् राजनीतिनिपुणः तथा स्वामिभक्तः राक्षसः यदि चन्द्रगुप्तस्य मन्त्रित्वं स्वीकरिष्यत् तर्हि राज्यमिदं स्थिरम् अभविष्यत्, एवञ्च भारतराष्ट्रम् एकस्य शक्तिशालिप्रशासकस्य अधीनत्वं प्राप्स्यत्। नाटकस्य अस्य इतिवृत्तम् एवं भवति -

प्रथमाङ्के चाणक्यः गुप्तचरेभ्यः सूचनां प्राप्नोति यत् कुसुमपुरे राक्षसस्य त्रयः विश्वस्ताः कार्यरताः सन्ति – क्षपणकः, शकटदासः, चन्दनदासः च। चन्दनदासस्य गृहे एव राक्षसस्य परिवारः निवसति। चाणक्यः गुप्तचरस्य सकाशात् चन्दनदासस्य गृहे राक्षसनामाङ्किताम् एकां मुद्रां प्राप्नोति। तस्याः मुद्रायाः साहाय्येन चाणक्यः शकटदासेन एकं कूटलेखं लेखयित्वा तं मुद्रयति। एषैव मुद्रा राक्षसस्य पराजयस्य कारणं भवति।

द्वितीये अङ्के राक्षसस्य राजनैतिकबुद्धेः प्रारम्भिकपराजयः निदर्शितः। राक्षसः गुप्तचरद्वारा कुसुमपुरस्य प्रवेशकाले चन्द्रगुप्तं हन्तुं गोप्ययोजनाम् अकरोत्, परन्तु चाणक्यस्य जागरुकतायाः कारणात् राक्षसस्य इयं योजना व्यर्था अभवत्।

तृतीये अङ्के कौमुदीमहोत्सवस्य मनोरञ्जकं वृत्तं वर्तते। अत्र चन्द्रगुप्तेन सह चाणक्यस्य कृतककलहस्य घटना घटते। चाणक्यः ज्ञात्वा राजाज्ञाम् उच्चरते। राक्षसः एतज्ज्ञात्वा 'स्वयोजना सफला' इति चिन्तयति।

चतुर्थेऽङ्के राक्षसः स्वयोजनां व्यर्थां पश्यति। स पर्वतराजकुमारं मलयकेतुं नन्दस्य सिंहासने उपवेशयितुम् इच्छति। मलयकेतुः प्रसन्नः सन् स्वाभूषणम् उपायनरूपेण राक्षसाय प्रेषयति।

पञ्चमेऽङ्के मूद्रितलेखेन आभूषणपेटिकया च सह सिद्धार्थकः गृहीतः। मलयकेतुः ज्ञातवान् यत् राक्षसः गोपनतया चन्द्रगुप्तेन सह मिलितः अस्ति। अस्य विरोधः केवलं चाणक्येन सहास्ति।

षष्ठेऽङ्के राक्षसः चन्दनदासम् अन्विष्यन् पाटलिपुत्रं प्राप्नोति। तत्र गत्वा स एकस्मात् जनात् सूचनां प्राप्नोति यत् चन्दनदासस्य प्राणाः सङ्कटापन्नाः सन्ति इति।

सप्तमेऽङ्के चाण्डालं चन्दनदासं हन्तुं वधस्थानं नयति। चन्दनदासपत्न्याः आर्त्तविलापे सति राक्षसः सहायः भूत्वा उपतिष्ठते। अत्रैव राक्षसः चन्द्रगुप्तस्य मन्त्रित्वम् अङ्गीकरोति।

# नवमः पाठः

## ज्योतिषशास्त्रम्

वेदस्य हि षट्स्वङ्गेषु ज्योतिषमन्यतममङ्गमस्ति। ज्योतिषं हि वेदस्य चक्षुष्ट्वेन स्मर्यते। उक्तञ्च पाणिनीयशिक्षायाम् - 'ज्योतिषामयनं चक्षुः'। ऋते ज्योतिश्शास्त्रात् तिथि-वार-नक्षत्र-योग-करणम् इति पञ्चाङ्गानां शुभाशुभज्ञानम् एवं पक्ष-मास-ऋतु-अयन-संवत्साराणां शुभाशुभज्ञानं नैव संपत्स्यते। यज्ञाद्यनुष्ठानानां, षोडशानां संस्काराणां, यात्रादीनां च मुहूर्त्तज्ञानाय ज्योतिश्शास्त्रस्य ज्ञानमावश्यकं वर्तते।

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिःशब्देनोच्यन्ते। नक्षत्रग्रहतारकादिज्योतिष्पिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते। वस्तुतस्तु शास्त्रमिदं ज्योतिषं ज्योतिर्विषयकमस्ति।

ज्योतिषशास्त्रं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमस्ति।

१. सिद्धान्तस्कन्धः - अयं गणितशब्देनाऽप्यभिधीयते। स्कन्धोऽयमपि ग्रहगणित-पाटीगणित-बीजगणितभेदेन त्रिविधः।

२. संहितास्कन्धः - स्कन्धोऽयं कालचक्रं मुहूर्तादि विवृणोति।

३. होरास्कन्धः - होरास्कन्धस्तु जातकताजिकभेदेन द्विधा विभक्तोऽस्ति। अयमेव फलितज्योतिषनाम्नाऽपि व्यवह्रियते।

शास्त्रस्यास्योपयोगो व्यवहारे बहुमुखः। अतः शास्त्रदृष्ट्या व्यवहारदृष्ट्या चोपयोगित्वेनैवेदं वेदाङ्गेषु मूर्धन्यत्वेन स्मर्यते। यथोक्तं लगधमुनिना -

**यथा शिखा मयूराणां नागानां मणयो यथा।**
**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥ इति।**

यज्ञानां प्रतिपादनाय एव वेदाः प्रवृत्ताः। तेषां हि यज्ञानां विधानं समुचिते काले विधीयते चेत् तदैव तत्फलं लभ्यते। ज्यौतिःशास्त्रं यज्ञविधानस्य युक्ततरं कालं निर्दिशति तस्मादेतच्छास्त्रं तत्कालविधायकशास्त्रम् इत्येतेन च नाम्ना भुवि सर्वत्र प्रख्यातं वर्त्तते। सत्यमेव उक्तमस्य महिम्नि -

**वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमकल्मषम्।**
**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति ।**



सिद्धान्तः (गणितम्)　　　　　　　　फलितज्योतिषम् (होरास्कन्धः)

ग्रहगणितम् पाटीगणितम् बीजगणितम्　　　　संहितास्कन्धाः　जातकम्　ताजिकम्
(कालचक्रं मुहूर्तादिवर्णनम्)

**सौरवर्षम् -**

सूर्यं परितः पृथिव्याः परिक्रमायां पञ्चषष्ठ्यधिकत्रिशतं दिनानि (३६५) पञ्चदश होराः (१५) एकादश निमेषाः (११) इत्येतावान् समयः अपेक्ष्यते। इदं कालचक्रमेव सौरवर्षम् इत्युच्यते।

**चान्द्रवर्षम् -**

पृथिव्याः चन्द्रमसः परिक्रमायां चतुःपञ्चाशदधिकत्रिशतं दिनानि (३५४) इत्येतावान् समयः अपेक्ष्यते। इदं कालचक्रं चान्द्रवर्षम् इति निगद्यते।

**सौरमानम् -**

सूर्यस्येदं सौरमानम्। 'सङ्क्रान्त्या सौर उच्यते' इति सूर्यसिद्धान्तोक्त्या -

सूर्यस्यैकांशभोगकालः - एकसौरदिनम्।

सूर्यस्यैकराशिभोगकालः - एकसौरमासः।

एकसौरमासः - त्रिंशत् सौरदिनानि।

त्रिंशत् सौरदिनानि- ३०.२६.१७.३७ सावनदिनानि।

सूर्यस्य द्वादशराशिः भोगकालः - एकसौरवर्षम्।

एकसौरवर्षम् - षष्ठ्यधिकत्रिशतं सौरदिनानि।

षष्ठ्युत्तरत्रिशतं सौरदिनानि- ३६५.१५.३०.२२.३० सावनदिनानि।

एतस्मिन् युगे रवेश्चक्रभोगाः ४३'२०'००० एतस्मिताः सिद्धान्तग्रन्थेषु प्रोक्ताः सन्ति। एत एव सहस्रगुणिताः ४'३२०'०००'००० एतस्मिताः कल्पे रवेश्चक्रभोगाः स्वीक्रियन्ते। यतः एककल्पे सहस्रमहायुगानि भवन्ति।

**युगादिमानः**

**त्रिंशत्सौरदिनैर्मासो वर्षं द्वादशभिश्चतैः।**
**तद्देवानामहोरात्रमसुराणां तथैव च॥१॥**
**सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्।**
**तत्षष्टिः षड्गुणा वर्षदिव्यमासुरमेव च॥२॥**
**अयुतघ्नैर्हि त्रिवेदैः सौरवर्षैश्च तैः समम्।**
**सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्॥३॥**

त्रिंशतः सौरदिनानाम् एकमासः, द्वादशमासानाम् एकवर्षम्, सौरवर्षं देवानाम् असुराणाञ्च अहोरात्रो भवति। यस्मिन् समये देवानां (उत्तरध्रुववासिनां) रात्रिर्भवति। तथा च यदा असुराणां दिनं भवति। तदा देवानां रात्रिर्भवति। सन्ध्यासन्ध्यांशसहितं द्वात्रिंशत्सहस्राधिकचतुर्लक्षस्य (४३०००००) सौरवर्षस्य एकं चतुर्युगं भवति।

**चान्द्रमानम् -**

चन्द्रस्येदं चान्द्रमानम् अथवा चन्द्रविषयकं मानं चान्द्रमानम्। एतद्धि तिथिभोगरूपकं विद्यते। रविचन्द्रयोः अंशात्मकान्तरादेतस्य परिज्ञानं भवति। सूर्यसिद्धान्ते प्रोच्यते यत् 'ऐन्दवस्तिथिभिः' इति। अर्थात् तिथिभिश्चान्द्रदिनानि भवन्ति। पुनरपि मानाध्याये प्रोक्तं यत् -

**अर्काद् विनिस्सृतः प्राची यद्यात्यहरहः राशिः।**
**तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः॥**

अतः अमान्तादमान्तं यावच्चान्द्रमासो भवति चैत्रवैशाखादिनाम्ना ख्यातः। विषयेऽस्मिन् भास्कराचार्यः एवं भणति - "रवीन्द्वोर्युतिः संयुतिर्यावदन्याविधोर्मास" इति।

# दशमः पाठः

## रामायणम्

संस्कृतसाहित्ये वाल्मीकिविरचितं रामायणम् आदिकाव्यं तत्प्रणेतृतया आदिकविः अभिधीयते। संस्कृतसाहित्ये तु छन्दोबद्धकविताया: समुद्भवो वाल्मीकित एवाजायत। महर्षिः वाल्मीकिः कया प्रेरणया आदिकाव्यं रामायणं लिलेख, इत्यमुष्मिन् विषये सुख्याताऽस्त्येका घटना। यदा महर्षिः स्नानार्थं सरो ययौ तदा कस्यचिद्व्याधस्य कृपाणैर्विद्धं क्रौञ्चद्वयोः एकं मृतमवलोक्य, विलपन्तीं क्रौञ्चीं ददर्श। करुणया विह्वलस्य वाल्मीकेर्मुखारविन्दाच्छोकतरङ्गिनी गीः श्लोकरूपेणैवं निःसृता -

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥**

महर्षेः मुखनिःसृतं करुणामयमिदं पद्यं भारतीयकाव्यस्य आदिकविता अभवत्। परमकल्याणमयीं वाणीं श्रुत्वा स्वयं ब्रह्मा समुपस्थाय वाल्मीकिं रामायणं रचयितुमादिदेश। अनया प्रेरणयैव महर्षिवाल्मीकिः रामायणं व्यरचयत्।

रामायणादिकाव्ये चतुर्विंशतिसहस्रं (२४००) श्लोकाः वर्तन्ते। अतः चतुर्विंशतिसाहस्रीसंहितापदेन रामायणं प्रथ्यते। गायत्रीमन्त्रे यावन्ति अक्षराणि तावत्सहस्र-परिमितं रामायणम् इति सिद्धम्। इदमपि प्रसिद्धं यत् प्रतिसहस्रतमश्लोकादौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। रामायणादिकाव्ये पञ्चशतं (५००) सर्गा वर्तन्ते। इह करुणरसो दृश्यते, सप्त काण्डाः (७) वर्तन्ते। ते यथा - बालकाण्डः, अयोध्याकाण्डः, अरण्यकाण्डः, किष्किन्धाकाण्डः, सुन्दरकाण्डः, युद्धकाण्डः, उत्तरकाण्डश्चेति। अत्र अनुष्टुप् छन्दश्च वर्तते।

वाल्मीकिः रामायणनामके काव्यग्रन्थे मर्यादापुरुषोत्तमस्य आदर्शगुणान् विवृणोति। तथा अरण्यकाण्डे राक्षसो मारीचोऽपि रावणं निकषा श्रीरामस्य गुणान् प्रशंसति। भागोऽयं बालकाण्ड-अयोध्याकाण्ड-अरण्यकाण्डेभ्यः केचन श्लोका अत्र सङ्गृहीताः।

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी॥१॥**

**अन्वयः -** नीयतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी इक्ष्वाकुवंशप्रभवः रामो नाम जनैः श्रुतः। (बालकाण्डम् - १.८)

**बुद्धिमान् नीतिमान् वाग्ग्मी श्रीमान् शत्रुनिबर्हणः।**
**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः॥२॥**

**अन्वयः** - विपुलांसः महाबाहुः कम्बुग्रीवः महाहनुः श्रीमान् बुद्धिमान् नीतिमान् वाग्मी शत्रुनिबर्हणः। (बालकाण्डम् - १.९)

**धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।**

**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्॥३॥**

**अन्वयः** - धर्मज्ञः सत्यसन्धः ज्ञानसम्पन्नः यशस्वी समाधिमान् शुचिः वश्यः प्रजानां हिते रतः च। (बालकाण्डम् - १.१२)

**धनदेन समस्त्यागे सत्ये धर्म इवापरः।**

**तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम्॥७॥**

**अन्वयः** - त्यागे धनदेन समः सत्ये अपरः धर्मः इव एवं गुणसम्पन्नं सत्यपराक्रमं तं रामम् (बालकाण्डम् - १.१९)

**देवासुरमनुष्याणां सर्वशास्त्रेषु विशारदः।**

**सम्यग्विद्याव्रतस्नातो यथावत् साङ्गवेदवित्॥१०॥**

**अन्वयः** - साङ्गवेदवित् सम्यग्विद्याव्रतस्नातः यथावत् देवासुरमनुष्याणां सर्वशास्त्रेषु विशारदः। (अयोध्याकाण्डम् - २.३४)

**स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः।**

**सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः॥१३॥**

**अन्वयः** - स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः श्रेयसां च सम्यग्योक्ता विगृह्य न कथारुचिः। (अयोध्याकाण्डम् - २.४२)

**रामो लोकाभिरामोऽयं शौर्यवीर्यपराक्रमैः।**

**प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः॥१४॥**

**अन्वयः** - अयं रामः शौर्यवीर्यपराक्रमैः लोकाभिरामः प्रजापालनसंयुक्तः न रागोपहतेन्द्रियः। (अयोध्याकाण्डम् - २.४४)

# एकादशः पाठः

# महाभारतम्

महाभारते लक्षपरिमिताः श्लोकाः विद्यन्ते अतः ग्रन्थोऽयं "शतसाहस्री" इत्यनेन प्रसिद्धिं प्राप्नोत्, ऐतिहासिकः ग्रन्थः सन् सम्पूर्णानां महाकाव्यनियमानां समावेशत्वात् रमणीयश्च महाकाव्यम् चास्ति। ग्रन्थेऽस्मिन् अष्टादशपर्वाणि (१८) विद्यन्ते। यथा-

(१) आदिपर्व (२) सभापर्व (३) वनपर्वम् (४) विराट्-पर्व (५) उद्योगपर्व (६) भीष्मपर्व (७) द्रोणपर्व (८) कर्णपर्व (९) शल्यपर्व (१०) सौप्तिकपर्व (११) स्त्रीपर्व (१२) शान्तिपर्व (१३) अनुशासनपर्व (१४) अश्वमेधपर्व (१५) आश्रमवासिपर्व (१६) मौसलपर्व (१७) महाप्रास्थानिकपर्व (१८) स्वर्गारोहणपर्व।

महाभारतस्यास्य प्रणेता कृष्णद्वैपायनः श्रीवेदव्यासः चिरञ्जीविषु अन्यतमः। पिता पराशरमुनिः माता चास्य सत्यवती। पराशरजातत्वात् पाराशर्य्यः पाराशरो वेति नाम्नापि ख्यातोऽयम्। यमुनायाः कस्मिंश्चिद् द्वीपे जनिं लेभे। अतः द्वैपायनः इति कथ्यते। कृष्णवर्णत्वात् कृष्णद्वैपायनः, वेदविभाजकत्वात् वेदव्यासश्च उच्यते। अविरामे परिश्रमे आत्मानं विनियोज्य महर्षिणा व्यासेन ग्रन्थोऽयं त्रिभिर्वर्षैः समापयत्।

महाभारते कौरवपाण्डवयोः युद्धं वर्णितम्। वस्तुतः महाभारतयुद्धं धर्मयुद्धम् इत्यनेनापि प्रसिद्धम्। उक्तञ्च भगवता श्रीकृष्णेन -

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥**

भारतीयसंस्कृतसाहित्यस्य सर्वोत्तमो ग्रन्थः श्रीमद्भगवद्गीता अस्यैवाङ्गभूता। विष्णुसहस्रनामस्तोत्रम्, अनुगीता, भीष्मस्तवः, गजेन्द्रमोक्षः, श्रीमद्भगवद्गीता इमे पञ्च महाभारतस्य रत्नानि विद्यन्ते। एभिर्गुणैरेव महाभारतं पञ्चमो वेदः कथ्यते। महाभारतस्य कथामाश्रित्यैव विविधैः कविभिः संस्कृतसाहित्ये काव्य-नाटक-गद्य-पद्य-चम्पू-कथा-आख्यायिकाः प्रणीताः। अतः कवीनामुपजीव्योऽयं ग्रन्थः।

## महाभारते सामाजिकमहत्त्वम्

महाभारतकालिकसमाजः मातृपितृगुरूणां पूजनीयं स्थानं बिभर्ति। तात्कालिकस्य भीष्मस्य पितृभक्तिः, एकलव्यार्जुनयोः गुरुभक्तिश्च सुप्रसिद्धा वर्तते। पुत्रीपुत्रयोर्मध्ये नासीत् लेशतोऽपि भेदः।

उक्तञ्च - "यथैवात्मा तथा पुत्रः, पुत्रेण दुहिता समा।" तात्कालिकगान्धारीकुन्तीद्रौपदीसुभद्रासत्यभामादिषु नारीषु कर्त्तव्यबोधः अधिकारानुकूलनस्य सामर्थ्यञ्चासीत्। तदानीन्तनाः शिष्याः चतुर्दशविद्यासु नदीष्णाः भवन्ति स्म। एतद्ग्रन्थावलोकनेन प्रतीयते यत्, अस्मदीयाः पूर्वजाः नूनं राजनीत्यामपि महान्तः कुटिलमतयो भवन्ति स्म।

राजनीतेः नेतारं प्रति महाभारतं श्रद्धानीयमादर्शं प्रकटयति। धर्मस्य व्यवस्थायाः उत्तरदायित्वं राजानमेवानुगच्छति। "अस्ति राजा राष्ट्रपुरुषाणां मेरुदण्डः" इत्यादिशब्दैः महाभारतम् उच्चैः राजधर्मस्य उत्कृष्टत्वं तथा राजनीतेः उपादेयतां निरूपयति। अस्मद्भारतं कृषिप्रधानं राष्ट्रम्। अतः कथनमिदं महाभारतस्य यद्यपि नेता स्वयं कृषिकर्मा न, स राष्ट्रसमितिप्रवेशाधिकार्यपि न। उक्तञ्च - "न नः स समितिं गच्छेत् यश्च नो निर्वपेन्महीम्।"

## महाभारते साहित्यिकं माहात्म्यम्

काव्यशास्त्रीयदृष्ट्या महाभारते 'पाञ्चालीरीतिः' वर्तते। ग्रन्थोऽयं ओज-प्रसाद-माधुर्यादिभिः सर्वैः काव्यगुणैः परिपूर्णोऽस्ति। यद्यपि महाभारते अङ्गीरसः शान्तरसः इति। तथापि भीष्मद्रोणकर्णशल्यादिषु पर्वसु वीररसोऽपि दृष्टिगोचरो भवति। अर्थालङ्कारेषु उपमा-रूपक-उत्प्रेक्षा-अर्थान्तर-न्यासाश्च प्रयुक्ताः। शब्दालङ्कारेषु मुखतया 'अनुप्रासः' इति दृश्यते। अत्र विदूरनीतेः केचिच्छ्लोकाः स्वीक्रियन्ते -

## विदूरनीतिः

**एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत्।**
**एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्॥ म.भा.उ. ३३.४६॥**

**अन्वयः** - एकः स्वादु न भुञ्जीत, एकः अर्थान् न चिन्तयेत्, एकः अध्वानं न गच्छेत्, एकः च सुप्तेषु न जागृयात्।

**एको धर्मः परं श्रेयः क्षमैकाशान्तिरुत्तमा।**
**विद्यैका परमा तृप्तिरहिंसैका सुखावहा॥३३.५२॥**

**अन्वयः** - धर्मः एकः परं श्रेयः, क्षमा एका उत्तमा शान्तिः, विद्या एका परमा तृप्तिः, अहिंसा एका सुखावहा।

**चत्वारि कर्माण्यभयङ्कराणि भयं प्रयच्छन्त्ययथाकृतानि।**
**मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः॥३३.७३॥**

**अन्वयः** - मानाग्निहोत्रम् उत मानमौनं मानेनाधीतम् उत मानयज्ञः चत्वारि कर्माणि अभयङ्कराणि अयथाकृतानि भयं प्रयच्छन्ति।

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥३३.७८॥**

**अन्वयः** - निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता (च, एते) षड् दोषाः भूतिम् इच्छता पुरुषेणेह हातव्याः।

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥३३.९९॥**

**अन्वयः** - प्रज्ञा च कौल्यं च दमः श्रुतं च पराक्रमः च अबहुभाषिता च दानं कृतज्ञता च (एते) अष्टौ गुणाः पुरुषं यथाशक्ति दीपयन्ति।

**चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।**
**प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥३४.२५॥**

**अन्वयः** - यः (राजा) चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं, लोकं प्रसादयति तं लोकः अनुप्रसीदति।

**गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः।**
**चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः॥३४.३४॥**

**अन्वयः** - गावः गन्धेन पश्यन्ति, ब्राह्मणाः वेदैः पश्यन्ति, राजानः चारैः पश्यन्ति, इतरे जनाः चक्षुर्भ्याम् (पश्यन्ति)।

**सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।**
**मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते॥३४.३९॥**

**अन्वयः** - धर्मः सत्येन रक्ष्यते, विद्या योगेन रक्ष्यते, रूपं मृजया (शौचेन) रक्ष्यते, कुलं वृत्तेन रक्ष्यते।

**असंत्यागात् पापकृतामपापां**
**स्तुल्यो दण्डः स्पृशते मिश्रभावात्।**
**शुष्केणार्द्रं दह्यते मिश्रभावात्**
**तस्मात् पापैः सह सन्धिं न कुर्यात्॥३४.७०॥**

**अन्वयः** - पापकृताम् असंत्यागात् अपापान् मिश्रभावात् तुल्यः दण्डः स्पृशते। मिश्रभावात् शुष्केण (काष्ठेन सह) आर्द्रं (काष्ठं) दह्यते। तस्मात् पापैः सह सन्धिं न कुर्यात्।

# द्वादशः पाठः

## जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते

महाभारतस्य शान्तिपर्वणो मोक्षधर्मपर्वणि भरद्वाज-भृगुमहर्षयोः संवादे वृक्षाणामपि चैतन्यगुणाः सन्ति इति निरूप्यते। ते वृक्षाः सुखदुःखयोर्ग्रहणं कुर्वन्ति, अनुभवं प्राप्नुवन्ति अत एव वृक्षे जीवोऽस्ति। वृक्षाः चैतन्यवन्तः। अत एव मनुष्याणां रोगोपशमनं, दुःखशमनं, निर्वहणं यथा उद्यमेषु, संस्थासु वा भवति तथा वृक्षाणां वनौषधीनाम् अरण्यानां च निर्वहणं भवेत्। तृणेष्वपि दयाभावना भवेत्, किमुत वृक्षादिषु। अतस्तेषां पीडनं न कुर्यात्। प्रस्तुतेऽस्मिन् पाठ्यांशे महाभारतस्य शान्तिपर्वणः चतुरशीत्यधिकशततमाध्यायाद् भरद्वाजभृगुसम्बद्धाः श्लोकाः सङ्गृहीताः।

**भरद्वाज उवाच**

**त एते धातवः पञ्च ब्रह्मा यानसृजत् पुरा।**
**आवृता यैरिमे लोका महाभूताभिसंज्ञिताः॥१॥**

**अन्वयः** - ते एते पञ्च धातवः पुरा ब्रह्मा यान् असृजत्, यैः इमे लोकाः आवृताः महाभूताभिसंज्ञाताः।

**यदाऽसृजत् सहस्राणि भूतानां स महामतिः।**
**पञ्चानामेव भूतत्वं कथं समुपपद्यते॥२॥**

**अन्वयः** - यदा सः महामतिः भूतानां सहस्राणि असृजत् (तदा) पञ्चानाम् एव भूतत्वं कथं समुपपद्यते।

**भृगुरुवाच**

**अमितानां महाशब्दो यान्ति भूतानि सम्भवम्।**
**ततस्तेषां महाभूतशब्दोऽयमुपपद्यते॥३॥**

**अन्वयः** - अमितानां महाशब्दः भूतानि सम्भवं यान्ति। ततः तेषां अयं महाभूतशब्दः उपपद्यते।

**चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः।**
**पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकम्॥४॥**

**अन्वयः** - अत्र चेष्टा वायुः, खम् आकाशम्, उष्म अग्निः, द्रवः सलिलम्, संघातः पृथिवी च (अस्ति) शरीरं पाञ्चभौतिकम्।

**इत्येतैः पञ्चभिर्भूतैर्युक्तं स्थावरजङ्गमम्।**
**श्रोत्रं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंज्ञिताः॥५॥**

**अन्वयः** - एतैः पञ्चभिः भूतैः स्थावरजङ्गमं युक्तं (अस्ति)। श्रोत्रं, घ्राणं, रसः, स्पर्शः, दृष्टिः च इन्द्रियसंज्ञिता (भवति)।

**भरद्वाज उवाच**

**पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः।**
**स्थावराणां न दृश्यन्ते शरीरे पञ्चधातवः॥६॥**

**अन्वयः** - यदि स्थावरजङ्गमाः पञ्चभिः भूतैः युक्ताः (सन्ति), (तर्हि) तु स्थावराणां शरीरे पञ्चधातवः (कथम्) न दृश्यन्ते।

**अनूष्माणामचेष्टानां घनानां चैव तत्त्वतः।**
**वृक्षाणां नोपलभ्यन्ते शरीरे पञ्चधातवः॥७॥**

**अन्वयः** - अनूष्माणाम् अचेष्टानां घनानां च वृक्षाणां शरीरे तत्त्वतः पञ्चधातवः न एव उपलभ्यन्ते।

**न शृण्वन्ति न पश्यन्ति न गन्धरससेविनः।**
**न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः॥८॥**

**अन्वयः** - (वृक्षाः) न शृण्वन्ति, न पश्यन्ति, न गन्धरससेविनः (सन्ति), न च स्पर्शं विजानन्ति, ते पाञ्चभौतिकाः कथम् (भवितुम् अर्हन्ति) ?

**अद्रवत्वादनग्नित्वादभूमित्वादवायुतः।**
**आकाशस्याप्रमेयत्वाद् वृक्षाणां नास्ति भौतिकम्॥९॥**

**अन्वयः** - वृक्षाणाम् अद्रवत्वात्, अनग्नित्वात्, अभूमित्वात्, अवायुतः, आकाशस्य अप्रमेयत्वात् (च तेषाम्) भौतिकं नास्ति।

**भृगुरुवाच**

**घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः।**
**तेषां पुष्पफलव्यक्तिर्नित्यं समुपपद्यते॥१०॥**

**अन्वयः** - घनानाम् अपि वृक्षाणाम् आकाशः अस्ति, (अत्र) संशयः न (अस्ति) तेषां पुष्पफलव्यक्तिः नित्यं समुपपद्यते।

**उष्मतो म्लायते पर्णं त्वक् फलं पुष्पमेव च।**
**म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते॥११॥**

**अन्वयः** - उष्मतः पर्णं म्लायते त्वक् फलं पुष्पम् एव च म्लायते शीर्यते अपि च तेन अत्र स्पर्शः विद्यते।

**वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।**
**श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः॥१२॥**

**अन्वयः** - वाय्वग्न्यनिनिर्घोषैः (वृक्षाणाम्) फलं पुष्पं (च) विशीर्यते श्रोत्रेण शब्दः गृह्यते तस्मात् पादपाः शृण्वन्ति।

**वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति।**

**न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः॥१३॥**

**अन्वयः** - वल्ली वृक्षं वेष्टयते सर्वतः गच्छति एव च अदृष्टे च मार्गः नास्ति तस्मात् (सिध्यति यत्) पादपा पश्यन्ति।

**पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि।**

**अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः॥१४॥**

**अन्वयः** - (वृक्षाः) पुण्यापुण्यैः तथा गन्धैः विविधैः धूपैः अपि च अरोगाः पुष्पिताः सन्ति तस्मात् पादपाः जिघ्रन्ति।

**पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात्।**

**व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे॥१५॥**

**अन्वयः** - पादैः सलिलिपानात् व्याधीनां च अपि दर्शनात् व्याधिप्रतिक्रियत्वात् च द्रुमे रसनं विद्यते।

**वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।**

**तथा पवनसंयुक्तः पादैः पिबति पादपः॥१६॥**

**अन्वयः** - यथा उत्पलनालेन वक्त्रेण जलम् ऊर्ध्वम् आददेत् तथा पवनसंयुक्तः पादपः पादैः (जलं) पिबति।

**सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्।**

**जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते॥१७॥**

**अन्वयः** - (वृक्षाणां) सुखदुःखयोः ग्रहणात् छिन्नस्य विरोहणात् च (अहं) वृक्षाणां जीवं पश्यामि (तेषाम्) अचैतन्यं न विद्यते।

**एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्**

**चातुर्मासे विशेषेण विना यज्ञादिकारणम्॥१९॥**

**अन्वयः** - एतेषां सर्ववृक्षाणां यज्ञादिकारणं विना छेदनं न कारयेत्, विशेषेण चातुर्मासे एव (एतेषां छेदनं न कारयेत्।)

# त्रयोदशः पाठः

# नैषधीयचरितम्

संस्कृतमहाकाव्येषु यानि बृहत्त्रय्यां परिगणितानि सन्ति तानि - "किरातार्जुनीयम्" (भारविविरचितम्) "शिशुपालवधम्" (माघविरचितम्) एवञ्च महाकविश्रीहर्षविरचितं "नैषधीयचरितम्" इति। उपर्युक्तेषु त्रिषु महाकाव्येषु "नैषधीयचरितम्" इति महाकाव्यस्य सर्वोत्कृष्टं स्थानं विद्यते।

काव्येऽस्मिन् द्वाविंशतिः सर्गाः त्रिंशदधिकाष्टाविंशतिशतं (२८३०) श्लोकाश्च विद्यन्ते। अवधेयम् अस्ति यत् प्रथमसर्गान्ते 'आनन्द' इत्यस्य प्रयोगात् काव्यमिदं आनन्दाङ्ककाव्यम् इत्यभिधीयते। अत्र नायकः नलः नायिका च दमयन्ती वर्तते। महाकविरयं काशीवास्तव्यस्य गढवालवंशोत्पन्नस्य विजयचन्द्रस्य सभापण्डित आसीत्। अस्य कवेः पिता हीरः माता च मामल्लदेवी

प्रस्तुतेऽस्मिन् पाठ्यांशे प्रथमसर्गस्य केचन श्लोकाः संकलिताः। अस्मिन् महाकाव्ये निषधदेशस्य अधिपस्य नलस्य चरित्रं वर्ण्यते।

**निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि।**
**नलस्सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥१॥**

**अन्वयः -** क्षितिरक्षिणः यस्य कथां निपीय बुधाः सुधामपि न आद्रियन्ते सितच्छत्रितकीर्तिमण्डलः महसां राशिः (इव) महोज्ज्वलः स नलः आसीत्।

**पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा।**
**कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति॥३॥**

**अन्वयः -** यत्कथा स्मृता अत्र युगे जगत्पवित्रम् आतनुते सा आविलाम् अपि स्वसेविनीम् एव मद्गिरं रसक्षालनया इव कथं न पवित्रयिष्यति।

**अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।**
**चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥४॥**

**अन्वयः -** अयं चतुदर्शसु विद्यासु अधीतिबोधाचरणप्रचारणैः उपाधिभिः चतस्रः दशाः प्रणयन् स्वयं चतुर्दशत्वं कुतः कृतवान् [इति] न वेद्मि।

**अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।**
**अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥५॥**

**अन्वयः -** अमुष्य रसनाग्रनर्तकी विद्या अङ्गगुणेन विस्तरं नीता त्रयी इव नवद्वयद्वीपपृथग्जयश्रियां जिगीषया अष्टादशतां अगाहत।

**स्फुरद्धनुर्निस्वनतद्धनाशुगप्रगल्भवृष्टिव्ययितस्य सङ्गरे।**

**निजस्य तेजश्शिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे ॥९॥**

**अन्वयः** - सङ्गरे परश्शताः परे स्फुरद्धनिर्निस्वनतद्धनाशुगप्रगल्भवृष्टिव्ययितस्य निजस्य तेजश्शिखिनः इङ्गालमिव अयशः वितेनुः।

**अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च।**

**दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने॥१७॥**

**अन्वयः** - दिनेश्वरश्रीः पटीयान् अयं देवः अजस्रम् अभ्यासम् उपेयुषा कविना बुधेन च मुदा समम् एव समयं नयन् दिने दिने उदयं दधौ।

**अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे।**

**तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः॥२०॥**

**अन्वयः** - तदङ्घ्रिणा पद्मेषु घृणा अधारि, पल्लवे तच्छयच्छायलवः अपि क्व ? शारदः पार्विकशर्वरीश्वरः तदास्यदास्ये अपि अधिकारितां न गतः।

**न केवलं प्राणीवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।**

**विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि॥१३१॥**

**अन्वयः** - त्वदीक्षणाद् विश्वसितान्तरात्मनः मम वधः केवलं प्राणीवधः न, विश्वासजुषां द्विषामपि निबर्हणं धर्मधनैः विशिष्य विगर्हितम्।

**मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।**

**गतिस्तयोरेष जनस्तमर्दयन् अहो विधे! त्वां करुणा रुणद्धि न॥१३५॥**

**अन्वयः** - अहो विधे ! मदेकपुत्रा जननी जरातुरा वरटा नवप्रसूतिः तपस्विनी एषः जनः तयोः गतिः तम् अर्दयन् त्वां करुणा न रुणद्धि।

# चतुर्दशः पाठः

## वेदभाष्यकाराः

वेदोऽखिलो धर्ममूलम् इत्युक्त्या ऋषिदृष्टाः अपौरुषेयाः वेदाः समग्रस्य धर्मस्य, भारतीयजीवनपद्धतेः, सर्वेषां मानवानां कर्तव्याकर्तव्ययोः बोधकाः सन्ति। वैदिक्यां संस्कृतभाषायां ऋषिभिः वेदाः दृष्टाः संप्रवर्तिताः च। प्राचीनकाले संस्कृतभाषा अखण्डे विशाले भारतवर्षे चतसृषु अपि दिक्षु भाषितभाषा आसीत् इति कारणतः सर्वे वेदाध्येतारः जनाः सुलभतया वेदार्थान् जानते स्म।

परञ्च शनैः शनैः वैदिकज्ञानपरम्परायाः अविच्छिन्ना धारा जनमानसात् तिरोधानं गता। अतः सर्वस्यापि वेदार्थस्य सम्यक् ज्ञानाभावात् मानवजीवनं, समाजः, राष्ट्रं च संस्कारपथात् दूरं गच्छेत्, संस्कृतिः विनश्येत् इति विचिन्त्य वेदार्थचिन्तकाः वेदभाष्यकाराश्च वेदानां भाष्याणि विरचितवन्तः।

ते च यथा - आचार्यः स्कन्दस्वामी, श्रीभट्टभास्करः, सायणाचार्यः, श्रीवेङ्कटमाधवः, आचार्यः उव्वटः, आचार्यः महीधरः, आचार्यः हलायुधः, श्रीमाधवाचार्यः च वेदभाष्यकाराः। आधुनिकाः व्याख्याकाराः स्वामी दयानन्दसरस्वती, आचार्यः श्री-अरविन्दः च आधुनिकदृष्ट्या वेदार्थान् आविश्चक्रुः।

**वेदभाष्यकारः स्कन्दस्वामी** -

ऋग्वेदसंहितायाः सर्वप्रथमभाष्यकारः स्कन्दस्वामी सौराष्ट्रस्य (गुजरातप्रदेशस्य) राजधानीरूपेण पुरा प्रथिते वलभी इत्याख्ये नगरे जनिम् अलभत। अस्य पिता भर्तृध्रुवः आसीत्। स्कन्दस्वामिनः शिष्यः हरिस्वामी।

अनेन कृते भाष्ये ऋग्वेदस्य मन्त्राणां विशदचर्चा वर्तते। ऋग्वेदस्य प्रत्येकं सूक्तस्यारम्भे सूक्तस्य ऋषेः देवतायाश्च उल्लेखो दृश्यते। निघण्टु-निरुक्तादीनां विषय-नामोद्धरणान्यपि अस्मिन् भाष्ये समुपलभ्यन्ते। भाष्यमिदं सरलभाषया मिताक्षरीच्छन्दसा प्रणीतं विद्यते। स्कन्दस्वामिनः इदं भाष्यं केवलं चतुर्थाष्टकं यावत् कृतम्। अपरभागद्वयं नारायणोद्गीथाभ्यां कृतम्।

**वेदभाष्यकारः भट्टभास्करः**

वेदभाष्यकारेषु भट्टभास्करः महत्त्वपूर्णः अस्ति। भट्टभास्करः कृष्णयजुर्वेद-तैत्तिरीयसंहिताम् आश्रित्य ज्ञानयज्ञनामकं भाष्यं प्रणीतवान्। कतिपयानां लुप्तानां वैदिकनिघण्टूनाम् उल्लेखः अपि अनेन अत्र कृतः अस्ति। अत्र मन्त्राणां न केवलं यज्ञपरकः अर्थः कृतः, अपि तु अध्यात्मपद्धत्या, अधिदैवतया अपि अर्थः वर्णितः अस्ति।

**वेदभाष्यकारः सायणः**

वेदभाष्यकारेषु सायणाचार्यः मूर्धन्यः सर्वोपरि च वर्तते। समग्रस्य वेदवाङ्मयस्य भाष्याणि सायणाचार्यः रचयामास। अयं महाराजबुक्कस्य आज्ञया, भ्रातुः माधवस्य अभिप्रेरणया च वेदभाष्यरचनायां प्रवृत्तोऽभवत्।

सायणाचार्यप्रणीतानि वैदिकवाङ्मयस्य भाष्याणि- तैत्तरीयसंहिता, ऋग्वेदसंहिता, सामवेदसंहिता, काण्वसंहिता, अथर्ववेदसंहिता, तैत्तिरीयब्राह्मणम्, तैत्तिरीयारण्यकम्, ऐतरेयारण्यकम्, ऐतरेयब्राह्मणम्, ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, देवताध्यायब्राह्मणम्, उपनिषद्ब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, वंशब्राह्मणम् इत्येतस्य समग्रस्य वैदिकवाङ्मयस्य सायणाचार्यः भाष्याणि प्रणिनाय।

सायणाचार्यः बुक्कमहीपतेः (१३६४ ई. तः १३७८ ई. यावत्) राजसभायामासीत् , तदादेशेन वेदभाष्याणि प्रणेतुं समारेभे। अतः सायणाचार्यो बुक्कमहाराजस्य समकालिकः इति ज्ञायते।

**वेदभाष्यकारो हलायुधः -**

सायणचार्यात् पूर्ववर्तिषु आचार्येषु हलायुधः ईदृशो विद्वान् आसीत्, यः काण्व-यजुर्वेदसंहितायाः स्वकीयम् उत्कृष्टं भाष्यं चकार। अस्य भाष्यस्य नाम ब्राह्मणसर्वस्वम् अस्ति। असौ बाल्यकालादेव राजपण्डितः अभवत्। नवयौवने श्वेतच्छत्रधारणस्य अधिकारम् अवाप्नोत्। वार्धक्ये च 'धर्माधिकारिणः' इति पदेन विभूषितः। अयं राज्ञः बल्लालसेनस्य समयकालिकः आसीत्। बल्लालसेनस्य सिंहासनारोहणकालः ११७०तमः ख्रीष्टाब्दः। अत एव विपश्चिद्भिः

हलायुधस्य अयमेव कालो निश्चियते। अनेन विदुषा ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, पण्डितसर्वस्वं चेति पञ्चग्रन्थाः प्रणीताः।

**वेदभाष्यकारो वेङ्कटमाधवः**

वेङ्कटमाधवः सम्पूर्ण-ऋक्संहितायाः भाष्यं चकार। अस्य पिता वेङ्कटाचार्यः, माता च सुन्दरी आसीत्। अयं चोलदेशवास्तव्यः त्रयोदशशततमात् वर्षात् (१३००) पूर्वम् एव आसीत्।

माधवस्य भाष्यं संक्षिप्तं वर्तते। तेनैवोक्तम् - वर्जयन् शब्दविस्तारं शब्दैः कतिपयैरिति। अस्य भाष्ये मन्त्रस्थपदानां व्याख्या एव कृता। वेदानां गूढार्थबोधने ब्राह्मणग्रन्थाः नितान्तोपयोगिन इति माधवेनोक्तम्।

**वेदभाष्यकारः उव्वटः**

कश्मीरकः विद्वान् उव्वटो यजुर्वेद-माध्यन्दिनसंहितायाः भाष्यकारेष्वन्यतमः। उव्वटकृते शुक्लयजुर्वेदभाष्ये उक्तम् -

**आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।**
**मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति॥**

भोजराजस्य शासनकाले अवन्त्याम् अद्यतन्याम् उज्जयिन्यां वसन् उव्वटः भाष्यं चकार इति ज्ञायते। भोजराजस्य समयः १०१८ ई. - १०६३ ई. भवति। अत उव्वटस्य समयः एकादशशतकस्य पूर्वार्द्ध आसीदिति निश्चयेन प्रमाणीकर्तुं शक्यते। अस्य भाष्यं अर्थगाम्भीर्येण पूर्णं, सरलं, प्रामणपरिष्कृतं चास्ति। अत्र मन्त्राणामर्थोऽध्यात्मपरतया व्यख्यातः अस्ति।

**वेदभाष्यकारो माधवाचार्यः**

माधवाचार्यः सामवेदसंहितायाः प्रथमं भाष्यम् अकरोत्। विवरणनामकं भाष्यमिदं सामवेदस्य द्वयोः आर्चिकयोः सम्पूर्णस्य व्याख्यानम् उपस्थापयति। पूर्वार्चिकभाष्यं छन्दसिकाविवरणम्, उत्तरार्चिकभाष्यम् उत्तरविवरणम् इति नामभ्यां प्रसिद्धमस्ति।

**वेदभाष्यकारो महीधरः**

महीधरः नागरब्राह्मणवंशीयः काश्यां निवासमकरोदिति ज्ञायते। काश्यामध्ययनं विधाय 'वेददीप' इत्याख्यं शुक्लयजुर्वेदभाष्यं तथा सामवेदभाष्यं च रचयामास। सप्तदशशततमे ईसवीयवत्सरे (१७०० ई.) सामभाष्यस्य रचनामकरोत् इति ज्ञायते।

**वेदभाष्यकारो दयानन्दसरस्वती**

गुर्जर-प्रान्तान्तर्गते टंकानगरे चतुर्विंशत्यधिकाष्टादशशततमे वर्षे (१८२४) लब्धजन्मा सामवेदीयौदीच्यब्राह्मणः मूलशङ्कर-नामको बालः, संन्यासात् परं स्वामी दयानन्दसरस्वती इति प्रसिद्धः वेदभाष्यकारेष्वन्यतमः, आधुनिकेषु वेदभाष्यकारेषु अग्रणीः। गुरुः पूर्णानन्दयतिः आसीत्। स्वामिवर्यः १८७५तमे वर्षे मुम्बई-नगरे आर्यसमाजस्य स्थापनां कृत्वा समाजस्य सर्वेषां जनानाम् उपकाराय वेदानां वैदुष्यपूर्णं भाष्यं रचयामास।

अस्य कृतिषु ऋग्वेदभाष्यम्, यजुर्वेदभाष्यम्, ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाशः इत्यादिग्रन्थाः वेदस्य प्रचारे प्रसारे च प्रमुखां भूमिकां निर्वहन्ति। अयं १८७५तमे वर्षे अक्टूबरमासस्य ३०तमे दिनाङ्के दीपावलीदिने दिवं जगाम।

**श्री-अरविन्दः**

आधुनिकवेदव्याख्याकारेषु महर्षेः अरविन्दस्य विचारः अत्यद्भुतः प्रशंसनीयः उपादेयश्चास्ति। The Secrets of the Vedas इति ग्रन्थे महर्षिः अरविन्दः प्राह यत् वेदमन्त्राः दिव्यस्रोतसः प्रस्फुटिताः ज्ञानराशयः, तेषु शाश्वतिकम् अपौरुषेयञ्च सत्यं निहितम् अस्ति।

# पञ्चदशः पाठः

## पुराणानि

पुराणानि भारतीयसंस्कृतसाहित्यस्य प्राणभूतानि सन्ति। पुराणेषु मुख्यतः पञ्चतत्त्वानां समावेशः स्वीक्रियते। सर्गः सृष्टिः, पुष्टिः, प्रतिसर्गः सृष्टेर्लयः पुनश्च सृष्टिर्वंशः सृष्ट्यारम्भे वंशावली मन्वन्तराणि के के मानवाः कदा अजायन्त इति वर्णनं वंशानुचरितं सूर्यचन्द्रवंशयोर्विशिष्टवर्णनम् इदं वस्तुपञ्चकं पुराणेषु अपेक्ष्यते। यथा -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**

पुराणानां भौगोलिकमपि महत्त्वं वर्तते। येषु अष्टादशानां (१८) द्वीपानाम्, चतुर्दशानां (१४) भुवनानाम्, क्षीरसागरदीनां वर्णनम्, भूविभाजनम्, तीर्थानाम्, सागराणाम्, सरिताम्, गिरीणाम्, भौगोलिकमहत्त्वभाजाम् अन्येषां च स्थानानां यत्र तत्र वर्णनं भूगोलखगोलविदां कृते विशिष्टं महत्त्वमाधत्ते। पुराणानां सामाजिकमपि महत्त्वम् अवर्णनीयम्। वर्णाश्रमव्यवस्थाविवरणम्, विविधसंस्काराणां विवरणम्, पारिवारिकसम्बन्धस्य विवेचनम्, गुरुशिष्यसम्बन्धस्य वर्णनम्, राजधर्मादिवर्णनं च पुराणेषु उपस्थापितं वर्तते।

अथर्ववेदानुसारं वेदैः सह पुराणानि समुद्भूतानि। "ऋचः सामानि छन्दांसि पुराणं यजुषा सह उच्छिष्टाज्जज्ञिरे सर्वे" प्राचीनभारतीयजनजीवनं संस्कृतिः, सभ्यता, ज्ञानम्, विज्ञानम्, धर्मः, पुरुषार्थश्च इत्यादीनां यत्र सुष्ठु विवरणं प्राप्यते तत् साहित्यमेव 'पुराणम्' इत्युच्यते।

श्रीमद्भागवतानुसारं पुराणानां दशलक्षणानि विद्यन्ते। यथा-

**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।**
**केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया॥**

*(भा.पु. १२/७/२०)*

कतिपयेषु पुराणेषु पुराणानां व्युत्पत्तिरपि लभ्यते तद्यथा -

**वायुपुराणे** - पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्। अर्थात् प्राचीनपरम्परायां यत् वर्णनमुपलभ्यते तत् पुराणम्।

**पद्मपुराणे** -'पुरार्थेषु आनयतीति पुराणम्' अर्थात् प्राचीनार्थानां प्रतिपादकं काव्यं पुराणम्।

**ब्रह्माण्डपुराणे** - पुरा एतदभूदिति पुराणम्' अर्थात् प्राचीनानां घटनानां पुराणम्।

**मत्स्यपुराणे** - पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।

**महाभारते** –'पुराणमाख्यं पुराणम्' अर्थात् प्राचीनाख्यानमेव पुराणम्।

केचन विद्वांसः अपि पुराणव्युत्पत्तिं परिभाषां वा उपस्थापयन्ति। एताः पुराणव्युत्पत्तयः परिभाषा वा इह प्रदीयन्ते।

**सायणः** - पुरातनवृत्ता- पुराणं तत्कथनरूपमाख्यानम्।

**यास्कः** - पुरा नवं भवति। अर्थात् प्राचीनत्वेऽपि नवीनत्वं पुराणत्वम्।

**पाणिनिः** - पुरा भवमिति पुराणम्। अर्थात् यत् पूर्वमभूत् तत् पुराणम्।

**राजशेखरः** - वेदाख्यानोपनिबन्धप्रायं पुराणम्।

पुराणानि अष्टादश सन्ति। उप पुराणान्यपि अष्टादश सन्ति। अनन्तरमष्टादश उपोपपुराणान्यपि सन्ति। अतः एतेषां सङ्ख्या चतुःपञ्चाशद् वर्तते। पुराणेषु भूताः वर्तमानाः भविष्यश्चार्था वर्ण्यन्ते। अष्टादशानां पुराणानां प्रदर्श्यतेऽत्र श्लोकानुसारेण

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते॥**

**मद्वयम्** - मत्स्यपुराणम् (१४,०००) मार्कण्डेयपुराणम् (९,०००) **भद्वयम्** - भविष्यपुराणम् (१४,५००) भागवतपुराणम् (१८,०००) **ब्रत्रयम्** - ब्रह्माण्डपुराणम् (१२,०००), ब्रह्मपुराणम् (१०,०००) ब्रह्मवैवर्तपुराणम् (१८,०००) **वचतुष्टयम्** - वामनपुराणम् (१०,०००), वराहपुराणम् (८१,०००), विष्णुपुराणम् (२३,०००), वायुपुराणम् (२४०००)**अनापलिङ्गकूस्कन्दानि** - अग्निपुराणम् (१६,०००), नारदपुराणम् (२५,०००), पद्मपुराणम् (५५,०००), लिङ्गपुराणम् (११,०००), गरुडपुराणम् (१९,०००), कूर्मपुराणम् (१७,०००), स्कन्दपुराणम् (८१,१००)।

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

**(भारतसर्वकारस्य शिक्षामन्त्रालयः)**

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः





# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

**(भारतसर्वकारस्य शिक्षामन्त्रालयः)**

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in